# जनयित्री
# JANAYITRĪ

## मातृतत्त्वाधारितं पुस्तकम्

*(A Book based on the Concept of Mother)*

मातृदेवो भव



(Let us treat our mothers like a Goddess)

सम्पादकः

डॉ. गगनचन्द्रदे

तिलोत्तमास्मृतिपरिषद

चिरकुला, कमर्दा, बालेश्वरम्, ओडिशा-७५६०७९

CamScanner

# जनयित्री
# JANAYITRĪ
## मातृतत्त्वाधारितं पुस्तकम्
***(A Book based on the Concept of Mother)***

***Publisher :***
- ***AUM BOOKS, Aum Foundation :*** Dolamandap Sahi, Puri, Odisha, PIN-752001

***1st Publication :***
21.Nov.2023 Jagadhhatri Puja

***Chief Editor :***
- ***Dr. Satish Chandra Panda :*** Principal, Shyam Sundar Sanskrit College, Bhograi, Balasore, Odisha

***Editor :***
- ***Dr. Gagan Chandra Dey :*** Associate Professor, P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, P.O.- Lutunia, Dist.- Paschim Medinipur, West Bengal, PIN-721166 What's App - 9474039621, Mob. : 8250459022 E-mail : chandragagan72@gmail.com

***Editorial Board :***
- ***Prof. (Dr.) Susanta Kumar Raj :*** Professor of Sahitya, Central Sanskrit University, Shree Sadasiva Campus, Puri
- ***Dr. Laxmikanta Sarangi :*** Associate Professor, Department of Sanskrit, Yogoda Satsanga Palpara Mahavidyalaya, Palpara, Purba Medinipur, West Bengal
- ***Dr. Sumanta Chowdhury :*** Assistant Professor, P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, P.O.- Lutunia, Dist.-Paschim Medinipur, West Bengal
- ***Dr. Prasanta Kumar Panda :*** Lecturer in Sanskrit, Udayanath (Autonomous) College of Science & Technology, Adaspur, Cuttack

ISBN : 978-93-94466-67-8
Copies : MC, Nov 2023
Price : ₹ 300/-
Printing Press : H.P. Computers
Near Gandharba Matha, Clark Road, Puri-752001

**Tilottama Smruti Parisad**
Chirakula, Kamarda, Dist.-Balasore, Odisha, Pin-756079

| क्रमाङ्कः | कीर्तिः | स्रष्टा / स्रष्ट्री | पृष्ठाङ्कः |
|---|---|---|---|
| ३१. | वैदिक स्त्रीदेवता | डॉ. शत्रुघ्नपाणिग्राही | १२९ |
| ३२. | मातृस्वरूपिणीमीश्वरीं वन्दे | श्रीदेवाशिषदाशः | १४० |
| ३३. | मातृतत्त्वम् | डॉ. सङ्कर्षणपण्डा | १४२ |
| ३४. | पूजार्हा गृहदीप्तयः | डॉ. हरप्रियादाशः | १४८ |
| ३५. | सीताया मातृरूपस्यानुशीलनम् | डॉ. नौनिहालगौतमः | १५३ |
| ३६. | नास्ति मातृसमो गुरुः | अमरेन्द्रनाथदासः | १६० |
| ३७. | सर्वतीर्थमयी माता | डॉ. गगनचन्द्रदे | १६४ |
| ३८. | क्षुधा-तृषार्ता जननीं स्मरन्ति | डॉ. लक्ष्मीकान्तषडङ्गी | १७० |
| ३९. | मातुर्माता न विद्यते | डॉ. अरविन्दमहापात्रः | १७४ |
| ४०. | मातृशक्तिः | डॉ. प्रकाशचन्द्रमिश्रः | १७८ |
| ४१. | मातृदिवसः | डॉ. सुमन्तचौधुरी | १७९ |
| ४२. | मातृतत्त्वम् | डॉ. प्रियव्रतबेहेरा | १८१ |
| ४३. | मातृतत्त्वम् | श्री शम्भुमान्ना | १८६ |
| ४४. | भारतीयसंस्कृतौ मातृतत्त्वम् | डॉ. शुभमयपाहाडी | १९० |
| ४५. | मातुरञ्चले सदा परिपूर्णे | डॉ. प्रशान्तकुमारपण्डा | १९६ |
| ४६. | मातृदेवो भव | श्री सत्येन्द्रनाथ आदकः | २०३ |
| ४७. | मातृतत्त्वम् | श्री गौतमशतपथी | २०७ |
| ४८. | स्त्रीणां गुरुः | श्री तन्मयरायः | २०९ |
| ४९. | अपरिशोधनीयं खलु मातृ-ऋणम् | डॉ. मानसप्रसूनभट्टाचार्य्यः | २१३ |
| ५०. | नास्ति मातृसमो गुरुः | डॉ. रत्नाकरखुण्टिआ | २१६ |
| ५१. | माता | श्री सौरभपोडेलः | २२० |
| ५२. | संस्कृतवाङ्मये नारीणां स्वरूपविमर्शः | श्री सन्दीपचटर्जी | २२४ |
| ५३. | जननी माता च | डॉ. कमलिनीपण्डा | २३१ |
| ५४. | संस्कृतसाहित्ये मातृतत्त्वस्य आलोचना | श्री चन्दनमहान्ती | २३४ |


## हिन्दी विभाग


| | | | |
|---|---|---|---|
| ५५. | ऋग्वैदिक समाज में नारी | डॉ. शशिभूषण मिश्र | २४० |
| ५६. | माँ तेरे कितने रूप | डॉ. नलिनी श्रीवास्तव | २५१ |

# मातृतत्त्वम्



**श्री शम्भुमान्ना**
सहायकाचार्यः संस्कृतविभागः,
मुगवेडिया-गङ्गाधर-महाविद्यालयः,
पूर्व मेदिनीपुरम्, भूपतिनगरम् (पश्चिमवङ्गः)

**'आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यात्'**[1] इति उपनिषद्मन्त्रात् ज्ञायते यत् सृष्टेः प्राक् आत्मा एक एव आसीत् तेन कामना कृता मे जायायाः उत्पत्तिः भववेदिति । औपनैषिदकी वाणीयं प्रकृततया नारीजातेः महिमाविषये भारतीयभावधारां उद्घोषयति । समग्रवैदिकसाहित्ये विशेषतः ऋग्वेदे पुरुषशासितसमाजस्य परिचयावाप्तेऽपि नारीस्थानं न आसीत् नितान्तम् उपेक्षणीयम् । अध्ययन-अध्यापन-शास्त्रचर्चा-शास्त्रविचारप्रभृतिविषयेषु वैदिकसमाजस्य नार्य्यः पुरुषाणां तुल्याधिकारसम्पन्ना आसन् । भारतीयदर्शने सृष्ट्या सार्कं अखण्डसत्ताप्रकाशरूपायणे नारीणां स्थानं अपरिहार्यमेव । आधुनिकसमाजे नार्य्याः व्यक्तिस्वातन्त्र्यं सम्पत्तेश्च उपरि पूर्णाधिकारः न परिलक्ष्यते । परिवारे अवैतनिकदासीरूपेण सन्तानोत्पादनस्य यौनयन्त्रतया पुरुषस्य चित्तविनोदनकारणेन च नार्य्यः व्यवह्रियन्ते । तासां नारीणां किमपि स्वातन्त्र्यं गुरुत्वं विद्यते इति आधुनिकसमाजस्य नैके स्वीकर्तुम् इच्छन्ति । पुरा मातृतान्त्रिकसमाजे आसीत् नारीणां स्थानं उर्द्ध्वं मर्यादापूर्णं च पुरुषेण साकं भारसाम्यपुर्णम् । परन्तु वर्तमानयुगे पुरुषस्य प्राधान्यात् मातृतान्त्रिकसमाजव्यवस्थायाः क्रमशः अवनतिः जायते । अतः समग्रे विश्वे प्रशस्ता भवति नारीशोषण-निपीडन-शृङ्खलकरणव्याप्तिः ।

'मनुसंहिता' इति ग्रन्थस्य अध्ययनं क्रियते चेद् येन केनापि सगर्वं कथयितुं शक्यते यत् नारीसम्मानप्रदाने मनुवत् एतादृशं चमत्कारविधानं कस्मिंश्चित् ग्रन्थे कस्मिन्नपि काले न प्राप्तम् । मनुसंहिताग्रन्थे आचार्येण मनुना नारीजातिं प्रति अतीव श्रद्धाशीलः मनोभावः व्यक्तः । तथाहि उच्यते-

**'यत्र नार्य्यस्तु पुज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।'[२] इति**

यत्र समाजे नारीणां श्रद्धा सम्मानं च परिलक्ष्येते तत्समाजस्य उत्तरोत्तरं समृद्धिः भवति। पुनः ये नारीणां योग्यसम्मानं न कुर्वन्ति तेषां सर्वं फलं निष्फलतां प्रति गच्छति। अयं तु नारीशक्तिमहिमाप्रशंसाकृतां सविधे अमृतस्वरूपः एव। स्त्रियः गृहस्य प्रकाशस्वरूपिण्यः। ताः आशीर्वादमानयन्ति। तथाहि उक्तं मनुसंहितायाम्—

**'प्रजनार्थमहाभागाः पूजार्हा गृहदीप्तयः।**
**स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन'[३] इति**

प्रजन्मात् प्रजन्मान्तरे स्त्रियः भवन्ति सर्वसुखस्य मूलम्, कारणं हि ताभिः सन्तानोत्पादन-धर्मपालन-परिवारपरिचर्चादिरूपकार्यं निष्पद्यते—

**'अपत्यं धर्मकार्याणि शुश्रुषा रतिरुत्तमा।**
**दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च हि ।।'[४] इति**

अन्यथा मातृरूपेण कन्यारूपेण स्त्रीरूपेण भगिनीरूपेण अथवा धर्मकर्मणोः अंशीदारतया नार्य्यः समाजकल्याणस्य प्रधानोत्सोपेताः इति महर्षिणा मनुना प्रतिपादितम्। पतिः पत्नी च आमृत्युः एकत्र स्थास्यतः। तौ जीवनसङ्गिरूपेण कस्यापि द्वितीयस्य ग्रहणं न करिष्यतः इति नारीपुरुषयोः परमधर्मः। अतः वेदे उच्यते धर्मकर्मणो पत्युः पत्न्या साकं कर्तव्ये।

न हि स्त्रीरत्नसमं रत्नम्। नारी राष्ट्रस्य अक्षि अस्ति। नारीशक्तिः शक्तिशालिसमाजस्य निर्माणं करोति। नारीणां चरित्रं कलुषितं चेत् समग्रः समाजः ध्वंसः भवति। अतः नारीरक्षणं समाजस्य प्रत्येकं जनस्य कर्तव्यम्। स्त्रिणां रक्षणरूपः धर्मः सर्वधर्मात् उत्कृष्टः। तद्धर्मस्य पालनं रक्षणं च तत्पिता-भर्ता-पुत्रैः करणीयम्। तथाहि-

**'पिता रक्षति कौमारे भर्ता रक्षति यौवने।**
**रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ।।'[५] इति**

यथा पुत्र आत्मतुल्यः तथा कन्या अपि पुत्रतुल्या। पितुः धनसम्पत्तौ कन्यायाः अपि अधिकारः अस्ति—

**'मातुस्तु यौतकं यत् स्यात् कुमारीभाग एव सः ।**
**दौहित्र एव च हरेदपुत्रस्याखिलं धनम्'**[६] इति

अस्मिन् जगति मातुः अतिमहत्त्वपूर्णं स्थान वर्तते । जननी स्वसुखदुःखम् अचिन्तयित्वा पुत्राणां पालनं रक्षणं वर्धनं च करोति। जगत्संसारे नास्ति जननीसदृशी छाया न च कोऽपि आश्रयः । माता स्वजीवनसमर्पणेन सन्तानानां परित्राणं करोति । तथाहि शान्तिपर्वणि महर्षिव्यासेन उक्तम्—

**'नास्ति मातृसमा छाया नास्ति मातृसमा गतिः ।**
**नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रिया ।।'**[७] इति

माता एव शिशोः सर्वस्वम् । मातैव ममता-दया-करुणानां मूर्तिस्वरूपा सा स्वपुत्रहितचिन्तनपरा संरक्षणसंवर्धनरक्ता सहस्रं कष्टमपि तृणवद् मन्यते । पुत्रस्य रक्षणं पालनं संवर्धनञ्च तस्याः जीवनस्य उद्देश्यम्। यथा वालपादपः मातृस्नेहजलासिक्तो विकसति तथैव स्नेहजलरहितस्य वालकस्य नान्या गतिरभ्युदयस्य । अतः वालकोऽपि मातरं स्वजीवनसर्वस्वं स्वर्गादपि श्रेष्ठं मन्यते । जननात् सा जननी इति कथ्यते । यदि वयं गर्भधारणात् प्रभृति पालन-पोषणपर्यन्तं मातुः स्नेहपूर्णं सद्व्यवहारं सहानुभूतिञ्च स्मरामः तर्हि अस्माकं हृदि महान् अनुरागः मातुश्चरणयोः आविर्भवति । एतादृशीं मातुः सहनशक्तिं स्मारं स्मारं कस्य सचेतसः अन्तःकरणं द्रवीभूतं न भवेत् । अत एव पुर्वाचार्यैः उपदिष्टम्-**'मातृदेवो भव'**[८] इति एवमेव मातुर्महत्त्वं महाभारतेऽपि दृश्यते-**'माता गुरुतरा भूमेः'**[९] इति

मातैव पुत्रस्य अनेक-कार्यसमादनाद् धात्री-जननी-अम्बा इत्यादिभिः शब्दैः स्तूयते । सत्यमेवोक्तम् –

**'कुक्षिसंधारणाद् छात्री जननाज्जननी स्मृता ।**
**अङ्गानां वर्धनादम्बा वीरसूत्वेन वीरसूः ।।**
**शिशोः शुश्रूषणाच्छश्रूर्माता देहमनन्तरम् ।**[१०] इति

अस्मिन् विषये मनुनापि प्रतिपादितं यद् मातापित्रोः ऋणात् कथमपि मानवस्य निस्तारो न भवति –

'यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ।।'[११] इति

एवं मातुः महत्वं सर्वैः ऊररीकृतम् । मातृभक्तश्रवणकुमारस्य कथा सर्वे वयं जानीमः । स्वमातृभक्त्या तेन अस्माकं मनसि स्थानं कृतम् । ईश्वरचन्द्रविद्यासागरमहाशयस्य भगवतः शंकराचार्यस्य च मातृभक्तिः सर्वजनविदिता । एतत् कथितं यत् पुत्रः कुपुत्रःयदि वा भवति, परन्तु माता कदापि कुमाता न भवति इति । दशरथपुत्रेण रामचन्द्रेणापि मातुः माहात्म्यं कीर्तितम्–'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति । मातृशब्दश्रवणेन निःशर्तस्नेहस्य यत्नस्य च वोधः भवति । मात्रा सह शिशूनां संयोगः चिरन्तनः इति मन्यते बन्धनस्यास्य जन्मतः प्राक् आरम्भात् । अतः प्रत्येकं जीवने गुरुत्वपूर्णां भूमिकां आवहन्ति मातर इति शम् ।

**पादटीका -**

१. वृहदारण्यकोपनिषद् १/४/१७
२. मनुसंहिता ३-५६
३. मनुसंहिता ९-२६
४. मनुसंहिता ९-२८
५. मनुसंहिता ९-३
६. मनुसंहिता ९-१३१
७. महाभारतम्, शान्ति, २६६-३१
८. तैत्तिरीयोपनिषद्, शिक्षावल्ली, ११.२
९. महाभारतम्, वन. ३१३.६०
१०. महाभारतम्, शान्ति. २६६-३२,३३
११. मनुसंहिता २-२२७

**ग्रन्थपञ्जी -**


१. भट्टाचार्य्यः, सुखमयः, रामायणेर चरितावली, कोलकाता, आनन्दधारा, १३७३
२. चट्टोपाध्यायः, धूर्जटिप्रसादः, रामायणम् प्रकृति पर्यावरण ओ समाज, कोलकाता, आनन्द, प्र.स-२०१४
३. भट्टाचार्य्यः, अमलेशः, रामायण कथा, कोलकाता, आर्यभारती
४. भट्टाचार्य्यः, सुकुमारी, प्राचीन भारत समाज ओ साहित्य, कोलकाता, आनन्द, १४०१
५. गीतानन्दः, श्रीरामेरअनुध्यान, उद्बोधन, प.स-२०१३
६. उपाध्यायः, बलदेवः, वैदिक साहित्य और संस्कृति, वाराणसी ।


⌘